Digitized by Arya Samaj Foundation Chennai and eGangotri

४३०
३ गा

R
30
HA-R

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म् ।

सा० संख्या ४३० पंजिका संख्या २२ ४३०

पुस्तकों पर सर्वप्रकार की निशानियां लगाना अनुचित है ।

कोई विद्यार्थी पन्द्रह दिन से अधिक पुस्तक नहीं रख सकता ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

COMPIL

R430
३ ग

R430,SHA-R
43360

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ओ३म्
गुरुकुल पुस्तकालय
कांगड़ी

॥ श्रीः ॥

रूपमालायाम्

प्रकीर्णके ३ भागे

प्रयोगविधिसंग्रहः

३

CHECKED 1973
Initial

जयपुरीय-प्रधानसंस्कृतपाठशालाध्यापक-

दाधीचपण्डितशिवदत्तशर्मणोपस्कृतः

सोऽयम्

मुम्बय्यां

श्रीकृष्णदासात्मजाभ्यां

गङ्गाविष्णु—खेमराज—गुप्ताभ्यां

स्वकीये

श्रीवेंकटेश्वराख्ययन्त्रालये

मुद्रणेन प्रकाशितः

शके १८११ संवत् १९४६

Registered for Copy-right under
act XXV of 1867

430,3GA
CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपमालायां मुद्रिता विक्रय्या ग्रंथाः—

१ षड्लिङ्गभागः (शब्दरूपावलिः)
२ संधिभागः
३ अव्ययार्थभागः
४ प्रयोगविधिसंग्रहः (कारकसमासतद्धितदिग्)

मुद्रयमाणाश्च ग्रन्थाः—

१ तिङ्कृद्रूपभागः (धातुरूपावलिः)
२ { क्रियाकलापः / अख्यातचन्द्रिका } (धातूनां तत्तदर्थबोधकौ)
३ धातुरूपभेदः
४ श्लोकयोजनिकोपायः
५ उदाहरणसंग्रहः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

॥ श्रीः ॥

प्रयोगविधिसंग्रहः ।

॥ श्रीगणेशाय नमः ॥

प्रथमः पटलः

प्रयोगमिच्छता ज्ञातुं ज्ञेयं कारकमादितः ।
संज्ञया षड्विधं भेदास्त्रयोविंशतिधा पुनः॥१॥

प्रयोगमिच्छतेति ॥ यो यथाविहितं शब्दप्रयोगं ज्ञातुमिच्छति तेन आदितः कारकं संज्ञया षड्विध 'कर्तृकर्मकरणसंप्रदानापादानाधिकरणानि षट् कारकाणि' इति ज्ञातुमर्हम् ॥

ननु कथं 'षट्कारकाणि' इत्युच्यते । संबन्धस्य कारकत्वं नास्ति' कथम् । क्रियाभावात् । क्रियान्वयशब्देनात्र किमुच्यते । धातोरर्थः क्रिया भवति पचति पठतीत्यादि ॥ तद्भेदाः पुनस्त्रयोविंशतिधा भवन्ति॥ १ ॥

तत्र पञ्चविधः कर्ता, कर्म सप्तविधं भवेत् ।
करणं द्विविधं चैव संप्रदानं त्रिधा मतम् ॥ २ ॥
अपादानं द्विधा चैव तथाधारश्चतुर्विधः ।

तत्रेति ॥ तत्र तस्मिन् त्रयोविंशतिधेति दर्शिते कारकचक्रे पञ्चविधः कर्ता, सप्तविधं कर्म, द्विविधं करणम्, त्रिविधं संप्रदानम्, द्विविधमपादानम्, चतुर्विधमधिकरणं चेति ।

तत्र पञ्चविधः **कर्ता** यथा-स्वतन्त्रकर्ता, हेतुकर्ता, कर्मकर्ता, अभिहितकर्ता अनभिहितकर्ता चेति ॥ तत्राद्यो यथा । पुण्यं करोति श्राद्धः । मैत्रीं भजन्ते सन्तः ॥ **हेतुकर्ता** यथा । हितं लभयन्ति विनीतान्धीराः । क्लेशादेवलोकं नियमयन्ति । 'तत्प्रयोजको हेतुश्च' इति हेतुसंज्ञा ॥ **कर्मकर्ता** यथा स्वयमेव मुच्यन्ते कुशलबुद्धयः । स्वयमेव दृश्यन्ते दुष्टजनदोषाः। स्वयमेव च्छिद्यन्ते प्राकृतजनस्नेहाः । 'कर्मवत्कर्मणा तुल्यक्रियः' इतिहि कर्मवद्भावः ॥ **अभिहितकर्ता** यथा । साधवः परार्थमापादयन्ति 'अभिहिते प्रथमा' इति प्रथमा ॥ **अनभिहितकर्ता** यथा । साधुभिरापाद्यन्ते परार्थाः । 'अनभिहिते कर्तरि' इति तृतीया ॥

कर्म सप्तविधं कथं । ईप्सितं कर्म, अनीप्सितं कर्म, ईप्सिता-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नीप्सितं कर्म, अकथितं कर्म, कर्तृकर्म, अभिहितं कर्म, अनभिहितं कर्म चेति ॥ तत्रेप्सितं कर्म यथा । दुर्विज्ञानमपि धर्मं विज्ञातुं श्रद्दधात्युदारधीः । 'कर्तुरीप्सिततमं कर्म' इति कर्मसंज्ञा ॥ (अनभिहिते कर्मणि द्वितीया) अनीप्सितं यथा । कल्याणमपि धर्मं प्रक्षिपन्ति पापबुद्धयः । विषं भक्षयन्ति क्षुद्राः । 'तथायुक्तं चानीप्सितम्' इति कर्मसंज्ञा ॥ ईप्सितानीप्सितं यथा । पायसं भक्षयँस्तत्र पतितं रजोऽपि भक्षयति बालकः ॥ अकथितं यथा । गां दोग्धि पयो गोपालकः । यज्ञदत्तं याचते कम्बलं ब्राह्मणः । ईशितारं भिक्षते सुवर्णमकिञ्चनः । व्रजमवरुणद्धि गां गोपालः । उपाध्यायं पृच्छति शास्त्रं शिष्यः । वृक्षमवचिनोति फलानि दारकः । शिष्यं ब्रवीति धर्मं गुरुः । शिष्यमनुशास्ति शास्त्रमुपाध्यायः । 'अकथितं च' इति कर्मसंज्ञा ॥ कर्तृकर्म यथा । गच्छति शिष्यो ग्रामम्, गमयति शिष्यं ग्रामं गुरुः । 'गतिबुद्धि-' इत्यादिना कर्मसंज्ञा ॥ अभिहितं कर्म यथा । कटः क्रियते देवदत्तेन ॥ अनभिहितं कर्म यथा । कटं करोति देवदत्तः ॥

कतमद्विविधं करणम् । बाह्यमाभ्यन्तरं चेति ॥ शरीरावयवादन्यद्यत्तद्बाह्यम् । यथा । दात्रेण लुनाति व्रीहीन्नरः । परशुना छिनत्ति वृक्षं देवदत्तः ॥ शरीरावयवाश्रितं यत्तदाभ्यन्तरम् । यथा । मनसा पाटलिपुत्रं गच्छति देवदत्तः । चक्षुषा रूपं गृह्णाति नरः । साधकतमं करणम्' इत्यनेन करणसंज्ञायां 'कर्तृकरणयोस्तृतीया' इति तृतीया ॥

कतमत्त्रिविधं संप्रदानम् । प्रेरकमनुमन्तृकमनिराकर्तृकं चेति ॥ तत्र प्रेरकं यथा । ब्राह्मणाय गां ददाति धार्मिकः । स हि ब्राह्मणो मनसाद्य 'गां मह्यं देहि' इति प्रेरयति तस्मात्प्रेरकमित्युच्यते ॥ अनुमन्तृकं यथा । सूर्यायार्घ्यं ददाति पुरुषः । स सूर्यो न प्रेरयति न निराकरोति तस्मादनुमन्तृकः ॥ अनिराकर्तृकं यथा । पुरुषोत्तमाय पुष्पं ददाति पुरुषः । स पुरुषोत्तमो मह्यं पुष्पं न ददातीति न प्रार्थयते, नानुमन्यते, न निराकरोति तस्मादनिराकर्तृकमित्युच्यते । 'कर्मणा यमभिप्रैति-' इति संप्रदानसंज्ञायां 'चतुर्थी संप्रदाने' इति चतुर्थी ॥

कतमद्विविधमपादानम् । चलमचलं चेति ॥ तत्र चलं यथा

---

१ सूर्यस्य त्वनिराकर्तृत्वमेव युक्तम् पुरुषोत्तमतो वैलक्षण्याभावात् कस्यचिदुपाध्यायस्यैव नामेति वा कल्पनीयम् ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धावतो रथात्पतति सारथिः। परिधावतो हस्तिनोऽङ्कुशं धारयन्पतत्याधोरणः॥ **अचलं** यथा। ग्रामादागच्छति देवदत्तः। पर्वतादवतरन्ति महर्षयः। 'ध्रुवमपायेऽपादानम्' इत्यपादानसंज्ञायाम् 'अपादाने पञ्चमी' इति पञ्चमी॥

कतमच्चतुर्विधमधिकरणम्। व्यापकमौपश्लेषिकं वैषयिकं सामीपिकं चेति॥ तत्र **व्यापकं** यथा। तिलेषु तैलं व्याप्तम्॥ **औपश्लेषिकं** यथा। कटे आस्ते पुरुषः। शकटे आस्ते ब्राह्मणः॥ **वैषयिकं** यथा। वनेषु शार्दूला वसन्ति॥ **सामीपिकं** यथा। नद्यां वसति घोषः। 'आधारोऽधिकरणम्' इत्यधिकरणसंज्ञायां 'सप्तम्यधिकरणे च' इति सप्तमी॥

करोति कारकं सर्वं तत्स्वातन्त्र्यविवक्षया॥ ३॥

करोतीति कारकमित्यन्वर्थसंज्ञा, तर्हि कर्तैव कारकसंज्ञो भवति नेतरे। अत्रोच्यते। तान्यपि कारकाण्येव, कुतः, तद्व्यापारेऽपि स्वातन्त्र्यविवक्षायां प्रतिकारकं स्वातन्त्र्यं विवक्ष्यते। अतः कर्मकरणसंप्रदानापादानाधिकरणानामपि कारकत्वं सिद्धम्॥ ३॥

तत्र कर्तर्यभिहिते प्रथमैव विधीयते।
तृतीया वाऽथ वा षष्ठी स्मृताऽनभिहिते द्विधा॥ ४॥

तत्रेति॥ तत्र कर्तृकर्मकरणसंप्रदानापादानाधिकरणेषु मध्ये अभिहिते कर्तरि प्रथमैव भवति। यथा। पचत्योदनं देवदत्तः॥ अनभिहिते कर्तरि द्वे विभक्ती भवतः। तृतीया वा अथवा षष्ठीति। तत्र तृतीया यथा। ओदनः पच्यते देवदत्तेन। 'कर्तृकरणयोस्तृतीया' इति तृतीया। षष्ठी यथा परलोकहितस्य सेवितव्यो धर्मः। परलोकहितेन वा सेवितव्यो धर्मः। 'कृत्यानां कर्तरि वा' इति षष्ठी॥

तथा कर्मण्यभिहिते विभक्तिं विद्धि पूर्विकाम्।
अनुक्ते प्रथमां हित्वा पञ्चमीं सप्तमीं तथा॥ ५

तथेति॥ यथाऽभिहिते कर्तरि प्रथमा तथा कर्मण्यभिहिते प्रथमैव भवति। यथा। ओदनः पच्यते देवदत्तेन। आहारो दीयते देवदत्तेन॥ **अनुक्त इति**॥ अनुक्ते कर्मणि प्रथमां पञ्चमीं सप्तमीं वर्जयित्वा शेषाश्चतस्रो विभक्तयो भवन्ति। काः शेषाः। द्वितीया, तृतीया, चतुर्थी, षष्ठी चेति॥ तत्र **द्वितीया** यथा ग्रामं गच्छति पुरुषः। 'कर्मणि द्वितीया'॥ **तृतीया** यथा। पुत्रेण संजानीते पिता। पुत्रं संजानीत इत्यर्थः। 'संज्ञोऽन्यतरस्यां कर्मणि' इति तृतीया॥ **चतु-**

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

र्थी यथा । ग्रामाय व्रजति पुरुषः । 'गत्यर्थकर्मणि' इति चतुर्थी ॥ **षष्ठी** यथा । कटस्य कारको देवदत्तः । 'कर्तृकर्मणोः कृति' इति षष्ठी ॥ ५ ॥

तृतीया पञ्चमी चैव षष्ठी च करणे त्रिधा ।

तृतीयेति ॥ तृतीया यथा-परशुना वृक्षं छिनत्ति देवदत्तः 'कर्तृकरणयोस्तृतीया' इतितृतीया ॥ **पञ्चमी** यथा-स्तोकान्मुक्तः स्तोकेन मुक्तः।'करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य'इति पञ्चमी ॥ **षष्ठी** यथा-घृतस्य संजानीते मित्रं घृतेन मित्रं प्रेक्षत इत्यर्थः । 'ज्ञोविदर्थस्य करणे' इति षष्ठी ॥

षष्ठी चतुर्थी तृतीया संप्रदाने तथा त्रिधा ॥ ६ ॥

षष्ठीति । षष्ठी यथा । पुरुषेण मृगश्चन्द्रमसो दातव्यः । चंद्रमसे दातव्य इत्यर्थः । 'चतुर्थ्यर्थे बहुलं छन्दसि' इति संप्रदाने षष्ठी ॥ **चतुर्थी** यथा । क्षुधितायौदनं ददाति देवदत्तः । चतुर्थी संप्रदाने' इति चतुर्थी ॥ **तृतीया** यथा । दास्या मालां संप्रयच्छते । युवा दास्यै मालां ददातीत्यर्थः । 'समस्तृतीया-' इतिसूत्रे 'दाणश्च सा चेच्चतुर्थ्यर्थे' इति तृतीया । उभयमनेन संभाव्यते । तृतीयाविभक्तिरात्मनेपदविधानं च । यदयं योगस्तृतीयायुक्ताद्दाणः 'दाणश्च सा चेच्चतुर्थ्यर्थे 'इत्यात्मनेपदमनुशास्ति । 'अशिष्टव्यवहारे तृतीया चतुर्थ्यर्थे भवतीति वक्तव्यम् । अशिष्टव्यवहारो धूर्तव्यवहारः ॥ ६ ॥

पञ्चमी खल्वपादाने वर्तते न ततोऽन्यथा ।
सप्तम्येवाधिकरणे कारकस्यैव संग्रहः ॥ ७ ॥

पञ्चमी इति ॥ पञ्चमी यथा । पर्वतादवतरन्ति महर्षयः । अपादाने पञ्चमी ॥

सप्तम्येवेति । सप्तमी यथा ग्रामे वसति । 'सप्तम्यधिकरणे च' इति सप्तमी ॥

कारकस्येति ॥ दिङ्मात्रं प्रदर्शितम् ॥ कारकसंग्रहो विस्तरेण वृत्त्यादिषु द्रष्टव्य इति ॥

इति श्रीवररुचिकृते प्रयोगविधिसंग्रहे प्रथमः पटलः ॥ १ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयः पटलः ।

अथ लक्षितोऽभिहितानभिहितयोः स्वभावः । कियन्तस्तदभिधायकाः, अनभिधायका वा उच्यन्ते—

समासस्तद्धितस्तिङ्कृच्चत्वारोऽस्याभिधायकाः ।
त एवानभिसंबन्धे भवन्त्यनभिधायकाः ॥ १॥

समास इति । अस्यामवस्थायामेव विधायका उच्यन्ते ऽकर्मणा कर्त्रा वा अभिसंबन्धे अभिधायका उच्यन्ते ।

ताभ्यामेव कर्मकर्तृभ्यामनभिसंबन्धे त एव चत्वारो ऽनभिधायका उच्यन्ते॥ १ ॥

षट् समासाश्च संक्षेपादष्टाविंशतिधा पुनः ।
नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥ २ ॥

षडिति । तत्पुरुषः, कर्मधारयः, बहुव्रीहिः, द्विगुः, द्वन्द्वः, अव्ययीभावश्चेति ॥ त एव विस्तरेणाष्टाविंशतिधा भवन्ति ॥ पश्चात्तद्विभागं वक्ष्यामः ॥

नित्येति । द्विविधः समासो भवति । नित्योऽनित्यश्चेति ॥

नित्यः- प्रकर्षेण वरः प्रवरः । कुम्भं करोतीति कुम्भकारः ॥ यदि नित्यसमासोऽयं । कथं'कुम्भं करोति' इति वाक्यं क्रियते ॥ नैष दोषः॥ अपरशब्देनाप्यर्थः प्रतिपाद्यते । यथा । स्त्रीष्वधिकृत्य प्रवर्तते । अधिस्त्रीति । 'कर्मण्यण्' इत्यण् । 'उपपदमतिङ्' इति समासः ॥

अनित्यसमासो यथा । राज्ञः पुरुषो राजपुरुष इति वा । ब्राह्मणस्य कम्बलो ब्राह्मणकम्बल इत्यादि षष्ठीसमासे अनित्यसमासः । विभाषितत्वादनित्यत्वमुच्यते ॥

लुगिति ॥ लुक्समासो यथा । कष्टं श्रितः कष्टश्रितः । 'द्वितीयाश्रितातीत-' इति समासः । 'कृत्तद्धित-' इति प्रातिपदिकसंज्ञायाम् 'सुपो धातु-' इति सुपो लुक् ॥

अलुक् समासो यथा । कण्ठे कालो यस्य स कण्ठेकालः । उरसि लोमानि यस्य स उरसिलोमा । 'सप्तम्युपमानपूर्व-' इति समासः । 'कृत्तद्धित-' इति प्रातिपदिक संज्ञायां 'सुपो धातु-' इति लुकि प्राप्ते 'अलुगुत्तरपदे' इत्यधिकृत्य 'अमूर्धमस्तकात्स्वाङ्गादकामे' इत्यलुक्समासः ॥ २ ॥

तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः ।
सप्तधा च बहुव्रीहिर्द्विगुराभाषितो द्विधा ॥ ३ ॥
द्वन्द्वश्चतुर्विधो ज्ञेयोऽव्ययीभावो द्विधा मतः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधम् ॥ ४ ॥

तत्रेति श्लोकद्वयम् । प्रथमादिविभक्तिभिः सप्तविधः, नञा चाष्टम इति ॥ तत्र **प्रथमातत्पुरुषो** यथा । पूर्वः कायस्य-अपरो वा-पूर्वकायः अपरकायः । 'पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे' इति ससासः ॥ अर्धं पिप्पल्याः अर्धपिप्पली कोशातक्या वा । अर्धकोशातकी 'अर्धं नपुंसकम्' इति समासः ॥ द्वितीयं भिक्षायाः द्वितीयभिक्षा भिक्षाद्वितीयं । एवं तृतीयादि । 'द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्' इति समासः ॥ प्राप्तो जीविकाम्-प्राप्तजीविकः । एवमापन्नजीविकः । 'प्राप्तापन्ने-' इति समासः ॥ कस्मात्प्रथमातत्पुरुष उच्यते । पूर्वपदस्य प्रथमान्तत्वात् । या विभक्तिः पूर्वपदस्य भवति स विशेषित उच्यते अतः प्रथमा तया विभक्त्या विशेषितत्वात् प्रथमातत्पुरुष इत्युच्यते ॥

द्वितीयातत्पुरुषो यथा । वृक्षं श्रितः वृक्षश्रितः । कान्तारमतीतः कान्तातीतः । नरकं पतितो नरकपतितः । ग्रामं गतो ग्रामगतः । शरमत्यस्तः शरात्यस्तः । तरङ्गमत्यस्तः तरङ्गात्यस्तः । सुखं प्राप्तः-सुखप्राप्तः । सुखमापन्नः सुखापन्नः । 'द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' इति समासः । वर्षभोग्यः वर्षभोग्यः । प्रयोजनं प्रेरितो यः प्रयोजनप्रेरितः । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । 'अत्यन्तसंयोगे च' इति द्वितीयासमासः ॥

तृतीयातत्पुरुषो यथा । शङ्कुलया खण्डः शङ्कुलाखण्डः । धान्येनार्थो धान्यार्थः 'तृतीया तत्कृतार्थेन गुणवचनेन' इति समासः । मासेन पूर्वो मासपूर्वः । मात्रा सदृशः मातृसदृशः । पित्रा समः पितृसमः । माषेनोनं माषोनम् । माषेण विकलं । माषविकलम् । वाचा कलहः वाक्कलहः । वाचा निपुणः वाङ्निपुणः । गुडेन मिश्रः गुडमिश्रः । आचारेण श्लक्ष्णः आचारश्लक्ष्णः । 'पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः' इति समासः ॥

चतुर्थीतत्पुरुषो यथा । यूपाय दारु यूपदारु । कुण्डलाय हिरण्यं कुण्डलहिरण्यम् । 'तादर्थ्ये चतुर्थी वाच्या' इति चतुर्थी । 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' इति समासः । 'अर्थेन नित्यसमासवचनं सर्वलिङ्गता वक्तव्या' । ब्राह्मणाय सूपः ब्राह्मणार्थः सूपः । ब्राह्मणायेयं भूः ब्राह्मणार्था भूः । ब्राह्मणाय इदं पयः ब्राह्मणार्थं पयः । ब्राह्मणाय बलिः ब्राह्मणबलिः । विप्राय हितम्-विप्रहितम् । द्विजाय सुखं द्विजसुखम् ।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गवे रक्षितं गोरक्षितम् इत्यादि। 'चतुर्थीतदर्था-' इति समासः॥

पञ्चमीतत्पुरुषो यथा। सिंहाद्भयं सिंहभयम्। 'पञ्चमी भयेन' इति समासः॥ अर्थादपेतः अर्थापेतः। सुखादपोढः सुखापोढः। 'अपेतापोढमुक्तपतितापत्रस्तैः-' इति समासः॥

षष्ठीतत्पुरुषो यथा। वृक्षस्य मूलं वृक्षमूलम्। 'षष्ठी' इति समासः। ब्राह्मणस्य याजको ब्राह्मणयाजकः। 'याजकादिभिश्च' इति समासः

सप्तमीतत्पुरुषो यथा। अक्षेषु शौण्डः अक्षशौण्डः 'सप्तमशौण्डैः- इति समासः। पाटलिपुत्रे सिद्धः पाटलिपुत्रसिद्धः। 'सिद्धशुष्कपक्वबन्धैश्च-' इति समासः॥

नञ्तत्पुरुषो यथा। न ब्राह्मणः अब्राह्मणः। 'नञ्' इति समासः॥

सप्तधा कर्मधारयः कतमः। विशेषणपूर्वपदः' विशेष्यपूर्वपदः, 'विशेषणोभयपदः, उपमानपूर्वपदः, उपमानोत्तरपदः, संभावनापूर्वपदः, अवधारणापूर्वपदश्च, इति।

तत्र **विशेषणपूर्वपदो** यथा। नीलं च तत् उत्पलं च नीलोत्पलम्॥

विशेष्यपूर्वपदो यथा। कृष्णश्चासौ सर्पश्च कृष्णसर्पः। 'विशेषणं विशेष्येण बहुलम्' इति समासः॥

तृतीयो यथा। शीतं च तत् उष्णं च शीतोष्णम्॥

चतुर्थो यथा। शङ्खवत् पाण्डुरः शङ्खपाण्डुरः॥

पञ्चमो यथा। नरः सिंह इव नरसिंहः। पुरुषोः वृषभ इव पुरुषवृषभः। 'उपमितं व्याघ्रादिभिः' इति समासः॥

षष्ठो यथा। गुण इव बुद्धिः गुणबुद्धिः। पुत्र इव ग्रहणम् पुत्रग्रहणम्। 'विशेषणं विशेष्येण-' इति समासः॥

सप्तमो यथा। गुण एव धनं गुणधनम्। सुहृद्बन्धुः। 'मयूरव्यंसका-, 'इति समासः॥

सप्तधा च बहुव्रीहिः। द्विपदः बहुपदः, सख्योतरपदः, सख्योभयपदः, सहपूर्वपदः, व्यतिहारलक्षणः, दिगन्तराललक्षणश्च, इति॥ आरुढो वानरो यं वृक्षं भवत्यारुढवानरो वृक्षः। इति द्विपदः। निर्जितः कामो येन स निर्जितकामः शिवः। उपनीतं भोजनं यस्मै उपनीतभोजनः। निष्क्रान्तो जनो यस्मात् स निष्क्रान्तजनः। शुक्लः पटो यस्य स शुक्लपटः। उषितः विभवो यस्मिन् स उषितविभवः। 'शेषो बहुव्रीहिः' इत्यधिकृत्य 'अनेकमन्यपदार्थे' इति समासः॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुपदो यथा। पराक्रमेण उपार्जिता सम्पत् येन स पराक्रमोपार्जितसम्पत्। पूर्ववत्समासः॥

तृतीयो यथा।उप समीपे दशानां ये सन्ति ते उपदशाः।उपविंशाः॥

तुरीयो यथा। द्वौ वा त्रयो वा द्वित्राः। 'संख्ययाव्यया-' इति समासः। 'बहुव्रीहौ संख्येये-' इति डच् समासान्तः॥

पञ्चमो यथा। सह मूलेन उद्धृततरुः समूलोद्धृततरुः। 'तेन सहेति-' इति समासः। 'वोपसर्जनस्य' इति सह शब्दस्य वा सभावः॥

व्यतिहारलक्षणो यथा। केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्य इदं युद्धं प्रवृत्तं दण्डादण्डि। 'तत्र तेनेदम्-' इति समासः।'अन्येषामपि दृश्यते' इति दीर्घत्वम्।'इच्कर्मव्यतिहारे'इति इच्समासान्तः। 'यस्येति च' इति अकारलोपः। 'तिष्ठद्गुप्रभृतीनि च' इति अव्ययीभावः। 'अव्ययीभावश्च, इति अव्ययसंज्ञायाम् 'अव्ययादाप्सुपः 'इति सुपो लुक्॥

दिगन्तराललक्षणो यथा। दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरं सा दक्षिणपूर्वा। उत्तरपूर्वा। ' दिङ्नामान्यन्तराले इति समासः। सर्वनाम्नो वृत्तिमात्रे पूर्वपदस्य पुंवद्भावः॥

द्विगुर्द्विविधः। एकवद्भावी, अनेकवद्भावो च, इति। **एकवद्भावी** यथा। त्रीणि शृङ्गाणि समाहृतानि इति त्रिशृङ्गम्। पञ्चमूली। 'तद्धितार्थोत्तरपदसमाहारे च' इति समासः। 'संख्यापूर्वो द्विगुः' इति द्विगुसंज्ञायाम् 'द्विगुरेकवचनम्' इत्येकवचनम्। 'स नपुंसकम्' अकारान्तोत्तरपदो द्विगुः स्त्रियां भाषितः 'इति स्त्रीलिङ्गतायां 'द्विगोः' इति ङीप्। त्रिशृङ्गादिभ्यस्तु न भवति। 'पात्रादिभ्यः प्रतिषेधो वक्तव्यः' ॥

अनेकवद्भावी यथा। चतस्रो दिशश्चतुर्दिशः। त्रयो लोकास्त्रिलोकाः। 'दिक्संख्येसंज्ञायां इति समासः॥

द्वन्द्वश्चतुर्विधो ज्ञेयः कथं समुच्चयः, अन्वाचयः, इतरेतरयोगः' समाहारश्च, इति। तत्र समुच्चयान्वाचययोरसामर्थ्यात्समासो नास्ति 'समर्थः पदविधिः' इत्यधिकारात्॥

१अत्रेदं चिन्त्यम्। 'तद्धितार्थोत्तरपदसमाहारे च' इत्युत्तरं 'संख्यापूर्वो द्विगुः' इति सूत्रप्रणयनात्तद्धितार्थाद्यङ्गीकारेणैव. द्विगुसंज्ञाविधानात्॥ तस्मात्तद्धितार्थान्तर्भावेण पञ्चकपालः, उत्तरपदे परतः 'द्विमासजातः' इत्यत्र 'द्विमास' इति खण्डे वोदाहर्तव्यः

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुच्चयो यथा। देवदत्तः पचति यज्ञदत्तश्च ॥

अन्वाचयो यथा। भिक्षामट गां चानय ॥

समाहारो यथा। शङ्खश्च पटहश्च शङ्खपटहम्। 'द्वन्द्वश्च प्राणितूर्य-' इति एकवद्भावः। 'स नपुंसकम्' ॥

इतरेतरयोगो यथा। देवदत्तश्च यज्ञदत्तश्च देवदत्तयज्ञदत्तौ 'चार्थे द्वन्द्वः' ॥

अव्ययीभावो द्विधा मतः नामपूर्वपदः, अव्ययपूर्वपदोपि ॥ तत्राद्यो यथा। शाकस्य मात्रा शाकप्रति। फलप्रति। 'सुप्प्रतिना मात्रार्थे' इति समासः ॥

द्वितीयो यथा। कुम्भस्य समीपे वर्तते उपकुम्भम्। 'अव्ययं विभक्ति-' इति समासः ॥ क्रममनतिक्रम्य वर्तते यथाक्रमं। येये वृद्धाः यथावृद्धम्। 'यथाऽसादृश्ये' इति समासः ॥ यावदमत्रं ब्राह्मणानामन्त्रयस्व इति यावन्ति अमत्राणि सन्ति तावतो ब्राह्मणान् आमन्त्रयस्व। 'यावदवधारणे' इति समासः ॥

तेषामिति। पूर्वपदार्थप्रधानः, उत्तरपदार्थप्रधानः, अन्यपदार्थप्रधानः, उभयपदार्थप्रधानश्च, इति समासश्चतुर्द्धा। **तत्पुरुषो** द्विधा। पूर्वपदार्थप्रधानः, उत्तरपदार्थप्रधानश्च इति ॥ **पूर्वो** यथा। पुरुषवृषभः। उत्तरो यथा। नीलोत्पलम् ॥

बहुव्रीहिर्द्विप्रधानः अन्योभयपदार्थप्रधानः इति ॥ अन्यपदार्थप्रधानो यथा। चित्रगुर्देवदत्तः ॥ द्वितीयो यथा। द्वित्राः ॥

द्वन्द्व उभयपदार्थप्रधानइति। यथा। शङ्खपटहम्[1] ॥

द्विगुरुत्तरपदार्थप्रधान एव। यथा। त्रिशृङ्गम्।

अव्ययीभावश्च त्रिप्रधानः। पूर्वोत्तरान्यपदार्थप्रधान इति। पूर्वपदार्थप्रधानो यथा उपकुम्भम् ॥ उत्तरपदार्थप्रधानो यथा। शाकप्रति- ॥ अन्यपदार्थप्रधानो यथा। उन्मत्ता गङ्गा यस्मिन् देशे स उन्मत्तगङ्गं देशः। 'अन्यपदार्थे च संज्ञायां' इति समासः। 'स्त्रियाः पुंवद्भाषित-' इति पुंवद्भावः।

इति समासलक्षणम् ॥

अथ प्राप्तावसरं तद्धितलक्षणमुच्यते

सामान्यात्ययभावारव्यस्त्रिविधस्तद्धितो मतः ॥
पदानां तु समथानां प्रथमाद्या प्रभूयते ॥ १ ॥

---

१ समाहारस्य विशेषणत्वमङ्गीकृत्येदमुक्तम् ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सामान्यवृत्तिरिति । तद्धितः सामान्यवृत्तिः, अव्ययसंज्ञः, भावचनश्च इति त्रिविधः ॥ **पदानामिति** । अनेकानां पदानां परस्परसमर्थानां प्रथमादेव पदात्तद्धितप्रत्ययः प्रसूयते ॥ तत्र **सामान्यवृत्तिस्तावदुच्यते** । मतुप् १ लच् २ इलच् ३ शः ४ नः ५ उरच् ६ णः ७ रः ८ वः ९ वलच् १० इनिः ११ ठन् १२ विनिः १३ युस् १४ ग्मिनिः १५ आलच् १६ आटच्१७ इनच् १८ आरकन् १९ आलुच् २० चेलुः २१ चूलः २२ ऊलः २३ अण् २४ वुन् २५ खञ्२६ अञ् २७ इञ् २८ फक् २९ ष्यञ् ३० ढक् ३१ ऐरक् ३२ ढ्रक् ३३ आरक् ३४ घः ३५ खः ३६ ण्यः ३७ यत् ३८ इत् ३९ इतच् ४० अनङ् ४१ चणप् ४२ चुञ्चुप् ४३ इष्ठन् ४४ ईयसुन् ४५ तरप् ४६ आमु ४७ तमप् ४८ कल्पप् ४९ देश्यः ५० देशीयर ५१ जातीयर्५२ द्वयसच् ५३ दघ्नच् ५४ मात्रच् ५५ ढक्५६ इति षट्पञ्चाशत् प्रत्यया भवन्ति । तत्र **मतुप्** यथा । गुणो यस्य यस्मिन् वाऽस्ति गुणवान् । गुणवती । गुणवत्कुलम् । 'तदस्यास्त्यस्मिन्निति मतुप्' । 'मादुपधायाश्चमतोर्वोऽयवादिभ्यः' इति मस्य वः ॥

लच् । चूडा यस्यास्ति यस्मिन् वा चूडालः । 'प्राणिस्थादातो लजन्यतरस्याम् इति लच् । वत्सलः । अंशलः । 'वत्सांशाभ्यां कामबले' इति लच् ॥

इलच् । फेनो यस्यास्ति फेनिलः । 'फेनादिलच्च' इति इलच् । एव तुन्दिलः । 'तुन्दादिभ्य इलच्च' इति इलच्॥

शः । लोमानि यस्य सन्ति लोमशः ॥

नः । पामा यस्यास्ति पामनः । (इलच्) । पिच्छं यस्यास्ति पिच्छिलः । 'लोमादिपामादिपिच्छादिभ्यः शनेलचः' ॥

उरच् । दन्ता उन्नता यस्य सः दन्तुरः ॥ 'दन्त उन्नत उरच्'

णः । प्रज्ञा यस्यास्ति स प्राज्ञः । श्रद्धा यस्यास्तीति श्राद्धः । आर्चः वार्त्तः । 'प्रज्ञाश्रद्धाऽर्चावृत्तिभ्यो णः' ।

रः । मधु यस्यास्ति स मधुरः । ऊषसुषिमुष्कमधो रः '॥

वः । केशवः । 'केशाद्वो न्यतरस्याम्' । 'वप्रकरणे मणिहिरण्ययोरुपसंख्यानम्' । मणिर्यस्यास्ति स मणिवः । एवं हिरण्यवः ॥

वलच् । रजो यस्यास्ति रजस्वला । 'रजःकृष्यासुतिपरिषदो वलच्'॥

इनिर्यथा । धनमस्यास्ति धनी ॥

ठन् - धनमस्यास्ति धनिकः । 'अत इनिठनौ' 'ठस्येकः' ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विनिर्यथा । यशो यस्यास्ति यशस्वी ।'अस्मायामेधास्रजो विनिः'॥

युस् । ऊर्णा यस्यास्ति ऊर्णायुः । 'ऊर्णाया युस्' ।

ग्मिनिः । वागस्यास्ति वाग्मी । 'वाचो ग्मिनिः' । 'सौ च' इति दीर्घः ॥

आलच् । यो बहु असंबद्धं भाषते स वाचालः ॥

आटच् । यो बहु असंबद्धं भाषते स वाचाटः । 'आलजाटचौ बहुभाषिणि' ॥

इनच् । फलानि यस्य सन्ति स फलिनः बर्हिणः । फलबर्हाभ्यामिनच् वक्तव्यः ॥

आरकन् । शृङ्गं यस्यास्ति स शृङ्गारकः । 'शृङ्गवृन्दाभ्या मारकन् वक्तव्यः' ।

आलुच् । निद्रालुः । तन्द्रालुः । श्रद्धालुः । 'निद्रातन्द्राश्रद्धाभ्य आलुच्[1] ' । शीतालुः । उष्णालुः । तृप्तालुः । 'शीतोष्णतृप्तेभ्यस्तन्न सहते इत्यालुच् वक्तव्यः ' ॥

चेलुः । हिमं न सहते हिमेलुः । 'हिमान्न सहत' इति चेलुः ॥

चूलः । बलं न सहते बलूलः । 'बलाच्चूलो[2] वक्तव्यः' ।

ऊलः । वातानां समूहः वातूलः । वातं न सहते वा । वातात्तन्नसहते इति 'ऊलः' ।

अण् । वसिष्ठस्यापत्यं वासिष्ठः । 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इति अण् ॥ उपगोरपत्यं औपगवः । प्राग्दीव्यतोऽण् ' इत्यधिकृत्य 'तस्यापत्यम्' इत्यण् ॥ आश्वपतम् । ' अश्वपत्यादिभ्यश्च' इत्यण् ॥ जनपदो यस्य निवासो स जानपदः । 'सोऽस्य निवासः' ॥ वैयाकरणः । 'तदधीते तद्वेद' । 'नव्याभ्यां पदान्ताभ्याम्' इत्यैजागमः ॥

वुन् । क्रममधीते क्रमकः । पदकः । 'क्रमादिभ्यो वुन् । 'युवोरनाकौ' ॥

अञ् । प्रियगूनां भवनं क्षेत्रं प्रैयगवीनम् । मौद्गीनम् । 'धान्यानां भवने क्षेत्रे खञ् ' ॥

अञ् । पञ्चालस्यापत्यं पाञ्चालः । वैदेहः । 'जनपदशब्दात्क्षत्रियादञ्, ॥ औत्सः । 'उत्सादिभ्योऽञ् ' ।

---

१ भाष्ये तु नैतद्दृश्यते । "हृदयाच्चालुः' हृदयालुः' इत्येतत्तु दृश्यते॥

२ भाष्ये तु 'बलाच्चोलः' इति पठित्वा ऊलएव प्रत्ययो दर्शितः ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इञ् । दक्षस्यापत्यं दाक्षिः । दाशरथिः । 'अत इञनृषेः' ।

फक् । नडस्यापत्यं नाडायनः । चारायणः । आश्वलायनः । 'नडादिभ्यः फक्' ॥

यञ् - गर्गस्य गोत्रापत्यं गार्ग्यः । 'गर्गादिभ्यो यञ्' ॥

ढक्- विनताया अपत्यं वैनतेयः । गाङ्गेयः । 'स्त्रीभ्यो ढक्' ॥

ऐरक्- चटकाया अपत्यं चाटकैरः । 'चटकाया ऐरक्' ।

दूक्- गोधाया अपत्यं गौधेरः । 'गोधाया दूक्' । 'लोपोव्योः-' इति यलोपः ॥

आरक्-गोधाया अपत्यं गौधारः ।' आरगुदीचाम्'

घः-क्षत्रस्याऽपत्यं क्षत्रियः । क्षत्राद्घः' । इयादेशः ॥

खः-कुलस्याऽपत्यं कुलीनः । 'कुलात्खः । इनादेशः ।

ण्यः-कुरोरपत्यं कौरव्यः । 'कुर्वादिभ्यो ण्यः' ।

यत्-मूर्ध्नि भवो मूर्धन्यः । उरस्यः । दन्त्यः । 'शरीरावयवाद्यत्' ॥

इत्- सुष्ठु गन्धो यस्य सुगन्धिः । उद्गन्धिः' । ' गन्धस्येदुत्पूतिसुसुरभिभ्यः' । कुमुदगन्धिः । कारीषगन्धिः' ।'सप्तम्युपमानपूर्वस्य बहुव्रीहिर्वाच्य उत्तरपदलोपश्च' । 'उपमानाच्च'इति इत्समासान्तः ॥

इतच् । कुसुमानि संजातानि यस्य स कुसुमितो वृक्षः । 'तदस्य संजातं तारकादिभ्य इतच्' ।

अनङ्-कुण्डप्रमाणं ऊधो यस्याः सा कुण्डोध्नी । 'ऊधसोऽनङ्' सकारस्यादेशः । प्रत्ययसंज्ञा च । 'बहुव्रीहेरूधसो ङीष्' ॥ कुसुममेव धनुर्यस्य स कुसुमधन्वा । 'धनुषश्च'इति अनङ् सकारस्य समासान्तः ॥

चणप् - दर्पेण वित्तो दर्पचणः ।

चुञ्चुप् - शब्देन वित्तः शब्दचुञ्चुः । तेन वित्तश्चुञ्चुप्चणपौ' । 'चुटू' इति इत्संज्ञा न भवति । तस्यानित्यत्वात् ।

इष्ठन् - सर्वे इमे पटवः । अतिशयेन अयमेषां पटुः । पटिष्ठः अतिशायने तमबिष्ठनौ' । 'टेः'इति टेर्लोपः ॥ अतिकर्त्ता करिष्ठः । 'तुरिष्ठेमेयःसु' इति टेर्लोपः ॥ अतिप्रियः प्रेष्ठः । अतिस्थिरः स्थेष्ठः । अतिस्फिरः स्फेष्ठः । बरिष्ठः, बंहिष्ठः, गरिष्ठः, वर्षिष्ठः, त्रपिष्ठः, द्रा-

---

१ भाष्ये तु 'यकारादी चुञ्चुप्–चणपौ' इत्युक्तम् ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

घिष्ठः, । 'प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थरफवर्बंहिगर्वर्षिन्नप्द्राघिवृन्दाः' आदेशाः स्यु। 'प्रकृत्यैकाच्' इति प्रकृतिभावः ॥ अतिशयेन स्थूलः इति स्थविष्ठः । एवं दविष्टः । यविष्ठः । ह्रसिष्ठः । क्षोदिष्ठः । 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादि परं पूर्वस्य च गुणः' ॥ सर्वेषाम् अतिशयेन बहुः भूयिष्ठः । 'बहोर्लोपो भू च बहोः' इति प्रत्ययेकारस्य लोपः । बहुशब्दस्य भूरादेशः' 'इष्ठस्य यिट् च' इति यिडागमः । अतिशयेन वृद्धः इति ज्येष्ठः । 'ज्य च' इत्यनुवर्तमाने 'वृद्धस्य च' इति ज्यादेशः । अतिप्रशस्यः श्रेष्ठः । लघुमृदुकृशपृथूनाम् लघिष्ठः म्रदिष्ठः क्रशिष्ठः प्रथिष्ठः । 'रकृतो हलादेर्लघोः' इति ऋकारस्य रादेशः । 'तुरिष्ठेमेयस्सु' इति वर्तमाने 'टेः' इति टेर्लोपः ॥ अन्तिकः नेदिष्ठः । बाढः साधिष्ठः । 'अन्तिकबाढयोर्नेदसाधौ' । तनिष्टः अणिष्टः श्वेतिष्ठः श्यामिष्ठः । अतिहरितः हरिष्ठः पञ्जरिष्ठः ॥

इयसुन् । द्वाविमौ पटू अतिशयेन अयं अनयोः पटुः । पटीयान् । स्थवीयान् । दवीयान् । यवीयान् । कनीयान् । 'युवाल्पयोः कनन्यतरस्याम्' । ह्रसीयान् । क्षेपीयान् । क्षोदीयान् । प्रेयान् । स्फेयान् । स्थेयान् । वरीयान् । बंहीयान् । गरीयान् । वर्षीयान् । त्रपीयान् । द्राघीयान् । वृन्दीयान् । महीयान् । साधीयान् । लघीयान् । क्रशीयान् । प्रथीयान् । द्रढीयान् । ज्यायान् इयसुनि ईकारस्यात्वम् । कनीयान् । श्यामः श्यामीयान् । पिञ्जरीयान् । 'द्विवचनविभज्योपपदे तरबीयसुनौ' ॥

तरप् । अयमनयोरतिशयेन कुमारः कुमारतरः । एवं पटुतरः । मृदुतरः । कृशतरः । लघुतरः । उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः । 'द्विवचनविभज्योपपदे तरबीयसुनौ' ॥

आम् । अतिशयेन पचति पचतितराम् । जल्पतितराम् । 'तिङश्च' इति तरप् 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' इति आम् । द्रव्यप्रकर्षे तु उच्चैस्तरस्तरुः ॥

तमप् । सर्वासामियमतिमृद्वी मृदुतमा । चपलतमा । 'अतिशायने तमबिष्ठनौ' ॥

कल्पः । ईषदिन्द्रो न समाप्यते इन्द्रकल्पः ॥

देश्यः । ईषत्पर्वतो न समाप्यते इति पर्वतदेश्यः मेघः ।

देशीयर । ईषत् राजा न समाप्यते राजदेशीयः 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जातीयर्। पटुप्रकारः पटुजातीयः। मृदुजातीयः। समजातीयः 'प्रकारवचने जातीयर्' ॥

द्वयसच्। ऊरु प्रमाणम् अस्य ऊरुद्वयसं जलम्॥

दघ्नच्। जानुप्रमाणमस्य जानुदघ्नम् ॥

मात्रच्। आस्यं प्रमाणमस्य आस्यमात्रम्। 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' ॥

ठक्। द्वारे नियुक्तः दौवारिकः। 'तत्र नियुक्तः' इति ठक्। 'द्वारादीनां च' इत्यैजागमः ॥ अक्षैर्दीव्यति आक्षिकः। खनित्रेण खनति खानित्रिकः। मुष्टिना जपति मौष्टिकः। 'तेन दीव्यति खनति जयति जितम्' इति ठक्। दध्ना संस्कृतं दाधिकम्। 'तेन संस्कृतम्' इति ठक् ॥ मरिचेन संस्कृतं मारिचिकम्। 'तेन संस्कृतं' इति ठक्। 'ठस्येकः'। 'किति च' इति आदिवृद्धिः ॥

इति सामान्याख्यस्तद्धितः समाप्तः ॥

अव्ययाख्यस्तद्धितः कतमः। तसिल् १, त्रल् २, अधुना ३, दानीम् ४, दा ५, र्हिल् ६, ह ७, अत् ८, थाल् ९, थम् १०, अस्ताति ११, द्यस् १२, उत् १३ आरिल् १४, समसण् १५ एद्यवि १६, द्य १७, एधुस् १८ अतसुच् १९, आति २०, रिल् २१, रिष्टाति २२ एनप् २३, आच् २४, आहि २५, धा २६, ध्यमुञ् २७, धमुञ् २८, एधाच् २९, आम् ३०, इति त्रिंशत्प्रत्ययाः॥

तसिल् यथा। कस्मादिति कुतः। 'कु तिहोः'। तकारहकारादौ प्रत्यये परे किमः कुः स्यात्। सर्वस्मादिति सर्वतः। यस्मात् इति यतः। तस्माद् इति ततः। 'प्राग्दिशो विभक्तिः' इति विभक्तिसंज्ञा। 'त्यदादीनामः' ॥ 'इदम इश्' । अस्मादिति इतः ॥ एतस्मात् अतः। 'एतदो ऽन्' इत्यन्भावः। 'तद्धितश्चासर्व-' इति अव्ययसंज्ञा। अव्ययादाप्सुप' इति सुपो लुक्। आदितः। 'अन्येभ्योऽपि दृश्यन्ते' इति वचनात्। 'किंसर्वनामबहुभ्यो द्व्यादिभ्यः' इत्यनेनाधिकृत्य 'पञ्चम्यास्तसिल्'॥

त्रल्। तस्मिन् इति तत्र। एतस्मिन् अत्र। यत्र बहुत्र कुत्र। अमुष्मिन् इति अमुत्र। 'सप्तम्यास्त्रल्'। 'अदसोतेः' इति अस्योत्वं मत्वं च॥

अधुना। अस्मिन् काले अधुना निपात्यते ॥

दानीम्। अस्मिन्काल इदानीम्। 'दानीं चेति' दानीम् प्रत्ययः। 'इदमः' इति इश् ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दा । सर्वदा । एकदा । अन्यदा । यदा । तदा । 'सर्वैकान्यकिंयत्तदः काले दा' इति दाप्रत्ययः ॥ सर्वदा सदा । 'सर्वस्य सोऽन्यतरस्याम्' ।

र्हिल् । तस्मिन्काले तर्हि । 'अनद्यतने र्हिल् अन्यतरस्याम्' । अस्मिन्काले एतर्हि । 'इदमो र्हिल्' । 'एतेतौ रथोः' इति रेफथयोः एत इत आदेशौ ॥

ह । अस्मिन्काले इह 'इदमो हः' । त्रलोपवादः । 'इदम इश्' ॥ कुह । 'वा ह च च्छन्दसि' इति वा हः । 'कु तिहोः' इति किमः कुः ॥

अत् । क्व 'किमोत्' । 'क्वाति' इति क्वादेशः ॥

थाल् । येन प्रकारेण यथा । सर्वथा । 'प्रकारवचने थाल्' ।

थम् । अनेन प्रकारेण इत्थम् । 'इदमस्थमुः' । थालोऽपवादः 'एते तौ रथोः' इति इतादेशः ॥ कथम् । 'किमश्च' इति थम् । 'किमः कः' ॥

अस्तातिः, अस् । पूर्वस्यां दिशि वसति पूर्वस्या दिश आगतः' पुरः, पुरस्तादागतः । पूर्वं रमणीयः । पुरः, पुरस्ताद्रमणीयः । 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमान्तेभ्यो दिग्देशकालेषु अस्तातिः' । 'पूर्वाधरावराणामसिपुरधवश्चैषाम्' । 'अस्ताति च' अस्तातौ च परे पूर्वादीनां पुरादयः स्युः ॥

द्यस् । समानेऽह्नि सद्य इति निपात्यते ॥ सद्यः परुत् परायैषमः, इति समानस्य सभावो द्यस्प्रत्ययश्चाहन्यभिधीयते ॥

उत्, आरिल् । परुत् परारिः । पूर्वस्मिन् वत्सरे परुत् । पूर्वतरस्मिन् वत्सरे परारिः । पूर्वपूर्वतरयोः परभावः उदारिलेतौ प्रत्ययौ भवतः । संवत्सरेऽभिधीयते ॥

समसण् । अस्मिन् संवत्सरे ऐषमः । इदम् शब्दात्समसण् । इदम इश्भावः । 'तद्धितेष्वचामादेः' आदिवृद्धिः ॥

एद्यवि । परस्मिन् अहनि परेद्यवि । परस्मादेद्यविप्रत्ययः ॥

द्य । अस्मिन्नहनि अद्य ॥

एद्युस् । पूर्वस्मिन् अहनि पूर्वेद्युः । परेद्युः । अन्येद्युः । अन्यतरेद्युः । इतरेद्युः । अधरेद्युः उभयेद्युः । उत्तरेद्युः । 'पूर्वान्यान्यतरेतराधरोभयोत्तरेभ्य एद्युस्' ।

अतसुच्- दक्षिणस्मिन् देशे वसति दक्षिणतो वसति । दक्षिणतो गच्छति । 'दक्षिणोत्तराभ्यामतसुच्' ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आति- उत्तरस्मिन् देशे वसति उत्तराद् वसति दक्षिणाद्वसति उत्तरादागतः। 'उत्तराधरदक्षिणादातिः' इत्यातिः॥

रिल्- ऊर्ध्वं वसति उपरि वसति॥

रिष्टाति- ऊर्ध्वं वसति उपरिष्टाद्वसति। 'उपर्युपरिष्टात्' उर्ध्वशब्दस्य उपभावः। रिल् रिष्टाति एतौ प्रत्ययौ भवतः॥

एनप्। पूर्वेण देशो रमणीयः। पूर्वदेशो रमणीय इत्यर्थः। 'एनबन्यतरस्यामदूरे पञ्चम्याः'॥

आच्। दक्षिणा देशो रमणीयः। 'दक्षिणादाच्'॥

आहि। दक्षिणस्यां दिशि ग्रामस्य दूरे वसति। दक्षिणाहि ग्रामाद्वसति। 'आहिच् दूरे'॥

धा। कतिप्रकारः कतिधा। बहुधा। 'संख्यायाः प्रकारे धा'॥

ध्यमुञ्। एकधा, ऐकध्यं कुरु। 'एकाद्धो ध्यमुञन्यतस्याम्'॥

धमुञ्। द्वैधम्, त्रैधम्,। 'द्वित्र्योश्च धमुञ्'॥

एधाच्। द्वेधा त्रेधा॥

आम्। 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे'। चिरन्तरमेव चिरन्तराम्। सुष्ठुतराम्। अतितराम्।

इत्यव्ययवाचकतद्धितः समाप्तः॥

भाववाचकः कतमः। त्व, तल्, इमनिच्, ष्यञ्, यत्, यः,। ढक्, यक्, अञ्, अण्, युञ्, इत्येकादश प्रत्ययाः॥

त्वतलौ- 'तस्य भावस्त्वतलौ'। पटोर्भावः पटुत्वम्। पटुता॥

इमनिच्। गुरोर्भावो गरिमा। पटिमा। अणिमा। तनिमा। स्थविमा। दविमा। महिमा। प्रेमा। क्षेपिमा। बंहिमा। द्राघिमा। भूमा। चेतसो भावः चेतिमा। कृशिमा॥

ष्यञ्- शैत्यम् नैल्यम् दार्ढ्यम् सौभाग्यम्। 'वर्णदृढादिभ्यः ष्यञ् च'। 'ष्टुद्भगसिध्वन्ते पूर्वपदस्य' इति उभयपदवृद्धिः॥

यत्। स्तेनस्य कर्मस्तेयम् 'स्तेनाद्यन्नलोपश्च'॥

यः। 'सख्युर्यः'। सख्युर्भावः सख्यम्॥

ढक्। 'कपिज्ञात्योर्ढक्'। कपेर्भावः कापेयम्। ज्ञातेयम्।

यक्। 'पत्यन्तपुरोहितादिभ्यो यक्'। बृहस्पतेर्भावः बार्हस्पत्यम्। प्राजापत्यम्। सैनापत्यम्। पौरोहित्यम्॥

अञ्। अश्वस्य भावः आश्वम्। औष्ट्रम्। कौमारम्॥

अण्। त्रिहायनस्य भावः त्रैहायणम्। द्वैहायनम्। चातुर्हायनम्।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यौवनम्। स्थाविरम्। 'हायनान्तयुवादिभ्योऽण्'। मुनेर्भावः मौनम्। पार्थम्। मार्दवम्। गौरवम्। 'इगन्ताच्च लघुपूर्वात्' इति अण्॥

वुञ्- 'योपधाद्गुरूपोत्तमाद् वुञ्'। रमणीयस्य भावः रामणीयकम्। आचार्यकम्॥ **इति प्रयोगविधिग्रहे द्वितीयः पटलः॥**

तद्धितप्रयोगमभिधाय तिङ्प्रयोगाभिधानं विधास्यामः।

तिङां च नवपूर्वार्द्धे लादेशावपरौ च द्वौ
परस्मैपदमाख्यातं तङानावात्मनेपदम्॥ १॥
परस्मै चात्मने भागे वचनानि त्रिधा विधा।
त्रयस्ते पुरुषा ज्ञेयाः प्रथमोत्तममध्यमाः॥ २॥
एकद्विबहुसंज्ञानि पदान्येकैकशस्तिङाम्।
परस्मै कर्तरि ज्ञेयं न भावे नापि कर्मणि॥ ३॥
आत्मने तु त्रिषु ज्ञेयं भावे कर्तरि कर्मणि।
धातोरकर्मकाद्भावे प्रथमैकवचस्तथा॥ ४॥
सकर्माऽकर्मकाद्धातोः कर्तरि स्मृतमात्मने।
यत्तु कर्मणि निर्दिष्टं क्रियते तत्सकर्मकात्॥ ५॥
नाम्नैव संनियोक्तव्ये प्रथमः पुरुषो भवेत्।
त्वं युवां यूयमित्येभिस्त्रिभिरेव तु मध्यमः॥ ६॥
अहमावां वयं त्वेभिरुत्तमो नान्यथा मतः।
अन्यथा च प्रहासे स्यात् त्वं मन्येऽहं च भोक्ष्यसे॥७॥

तिङः कतमः। तिप् तस् झि। सिप् थस् थ। मिप् वस् मस्। त आताम् झ। थास् आथाम् ध्वम्। इट् वहि महिङ्। इत्यष्टादशधा तिङ् वेदितव्यः। तत्र तिङ्समूहे दशधा संज्ञा। प्रत्ययसंज्ञा, विभक्तिसंज्ञा, परस्मैपदसंज्ञा, आत्मनेपदसंज्ञा, प्रथमपुरुषः. मध्यमपुरुषः उत्तमपुरुषः, एकवचनसं० द्विवचनसं० बहुवचनसं०॥ केषां प्रत्ययसंज्ञा। सर्वेषाम्। विभक्तिसंज्ञा च॥ (**परस्मैपदमिति।**) तिङां नव पूर्वाणि वचनानि यौ द्वावपरौ 'शतृ, क्वसुच्' इत्येकादशधा परस्मैपदानि॥ तङ्च आनश्च तङित्यनेन तिङां उत्तराणि नववचनानि गृह्यन्ते। आन इति शानच्कानचोरुत्सृष्टानुबन्धयोर्ग्रहणम्। एवं आत्मनेपदमेकादशधा॥

परस्मै इति। उभयपक्षेऽपि प्रथममध्यमोत्तमाः पुरुषा वेदितव्याः॥ एवमात्मनेपदेऽपि।

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परस्मैपदं कर्तर्येव प्रयोक्तव्यं न भावकर्मणोः ॥ ननु यदि परस्मैपदं कर्तर्येव प्रयोज्यं, तर्हि कथं (लोके) पच्यति क्रियति पुरुषकारा अनुवर्तयन्ति । (नाभ्यामिति) । पच्यति क्रियति एतद्वेदिरूपे परस्मैपदसंज्ञके न भवतः । अपि तु तिङ् व्यत्ययात्सत्यपि परस्मैपदश्रवणे आत्मनेपदं ज्ञातव्यम् ॥ **आत्मन इति**। आत्मनेपदं भावे कर्तरि कर्मणि च भवति । इत्युक्ते (किं तर्हि) सर्वेभ्यो धातुभ्यो नापि सर्वे प्रथममध्यमोत्तमा भवन्ति । नापि सर्वाणि वचनानि । किं तर्हि भावेऽकर्मकादेव धातोरात्मनेपदं भवति । प्रथमपुरुषैकवचनमेव भवति । यथा–स्थीयते देवदत्तेन। न कदाचित्स्थीयेते ॥ **सेति**। प्रहासे प्रयोगः कर्तव्यः । मन्ये त्वं भोक्ष्यसे अहमिति । मध्यमपुरुषस्थाने उत्तमपुरुषप्रयोगः कर्तव्यः । नान्यत्र ॥

उक्तं तिङस्वरूपमात्रम् । तिङः प्रयोगस्तु कश्चिद्विस्तरेण वक्ष्यति (ते) । अस्ति कस्यचित्प्रयोगस्य कर्मणि प्रथमा । यथा । वृक्षः छिद्यते तक्षकेन । क्वचिद्द्वितीया स्यात् । यथा । वृक्षं छिनत्ति तक्षकः । क्वचित्षष्ठी– वृक्षस्य रुजति त्वागः । 'रुजार्थानां भाववचनानामज्वरे' इति षष्ठी। शत्रूणां पिनष्टि राजा । 'जासिनि–' इति षष्ठी । कदाचित् चतुर्थी— ग्रामाय व्रजति पुरुषः । गत्यर्थे चतुर्थी द्वितीया च ॥

द्विकर्मणिजन्तप्रयोगो विज्ञेयः । यस्मात्तिङ्प्रयोगविषमो द्विकर्मणिजन्तः तत्प्रदर्शयिष्यामः । णिजन्तेभ्यो धातुभ्यः कर्मविवक्षायां द्विकर्मणी अभिधीयेते । प्रधानमप्रधानं चेति । तत्र तिङन्तेन पदेन प्रधानकर्माभिधीयते। यतो भाष्यकार एवमाह । द्विकर्मकेषु धातुषु कर्मविवक्षायां तिङा प्रधानकर्माऽभिधीयते। अपेक्षितत्वाच्च कर्मणः प्रथमैव भवति । अप्रधाने अनभिहितत्वात् द्वितीयैव भवति। अनभिहिते कर्तरि तृतीया भवति । उदाहरणम् नीयते देवदत्तेन अजा ग्रामम् । आकृष्यते गौर्गोपालेन व्रजम् ॥

दुह्यादीनां प्रयोगे कर्मविवक्षायाम् अप्रधानकर्म अभिधीयते तिङ्पदेन ॥ तदाह– दुह्यते गौर्देवदत्तेन पयः । याच्यते राजा ब्राह्मणेन धनम् । रुध्यते गौर्देवदत्तेन व्रजम् । पृच्छ्यते भिक्षुको वानप्रस्थेन ग्रामं । भिक्ष्यते पालको माणवकेन क्षीराणि । चीयते तरुर्देवदत्तेन फलानि ।

---

१ प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणि ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उच्यते यजमानो धर्ममृषिणा । शिष्यते शास्त्रं गुरुणा शिष्यः ॥ ण्यन्तेभ्यो धातुभ्यो यः कर्ता कर्मभूतः स एवाभिधीयते ॥ गच्छति भृत्यो ग्रामम् । गमयति भृत्यं ग्रामं गुरुः । गम्यते भृत्यो ग्रामं गुरुणा ॥ बुध्यते शास्त्रं शिष्यः । बोधयति शास्त्रं शिष्यं गुरुः । बुध्यते शास्त्रं शिष्यो गुरुणा ॥ ओदनं भुङ्क्ते ब्राह्मणः । भोजयति ब्राह्मणमोदनं यजमानः । भोज्यते ब्राह्मण ओदनं देवदत्तेन ॥ पठति माणवकः शास्त्रम् । पाठयति माणवकं शास्त्रमुपाध्यायः ॥ पाठ्यते माणवकः शास्त्रमुपाध्यायेन । आस्ते आसने अतिथिः । आसयति अतिथिम् आसने नागरः । आस्यते ऽतिथिरासने नागरेण ॥ 'कर्तुः कर्मसंज्ञायां नीवह्योः प्रतिषेधो वाच्यः' । 'गतिबुद्धि-' इत्यादिना (प्राप्ता) यथा । देवदत्तो नयति गां । नाययति देवदत्तेन गां यज्ञदत्तः । कर्तर्यनभिहिते कर्मणि पुनरभिहिते नीयते गौर्ग्रामं देवदत्तेन । वहति भारं देवदत्तः ग्रामम् । वाह्यते देवदत्तेन भारो ग्रामम् ॥ सर्वत्र प्रत्यवसानार्थे अदे 'रजग्धान्तस्य प्रतिषेधो वाच्यः' यत्किंचित्कार्यं प्रत्यवसानाऽर्थे निर्दिष्टम् । अदेर्धातोरजग्धान्तस्य सर्वस्मिन् विधौ (कर्मसंज्ञा मा भूत्) । णिजन्तस्यादेः 'निगरणचलनार्थेभ्यश्च' इत्यन्तेन सूत्रेण परस्मैपदं प्राप्तं तन्मा भूत् । 'गतिबुद्धी' त्यादिना यः कर्ता पूर्वस्तस्य कर्मसंज्ञा मा भूत् । यथा आदयति पायसं देवदत्तेन यज्ञदत्तः । आदयते पायसं देवदत्तं यज्ञदत्तः । तस्य कर्मसंज्ञाप्रतिषेधः इति । यदि वक्तव्यो नास्ति । एवं प्रतिषेधो भविष्यति । आदयति पायसं देवदत्तं यज्ञदत्तः । अजग्धान्तस्येति किम्—इदमेषां जग्धं । 'क्तोधिकरणेचाध्रौव्यगतिप्रत्यवसानार्थेभ्यः' इति क्तः । 'अदो जग्धिर्ल्यप्तिकिति' इति जग्धिरादेशः । अत्र षष्ठीप्रतिषेधो मा भूत् । क्तवतिपर्युदासो न स्यात् । 'अधिकरणवाचिनश्च' इत्यनेन क्तप्रत्ययस्य योगे षष्ठी स्यात् । किं च तृतीयैव स्यात् ॥ भक्षेरहिंसायाम् । भक्षेर्धातोरहिंसायामर्थे कर्तुः कर्मसंज्ञाप्रतिषेधः । भक्षयति पिण्डं देवदत्तः । अयं णिच् वा चुरादिगणः । पुनर् 'हेतुमतिच' इत्यनेन णिच् विधीयते । हेतुमति लक्षणे विधीयमाने णिप्रयोगः । भक्षयति पिण्डं देवदत्तेन यज्ञदत्तः । अहिंसायां किं । भक्षयति बलीवर्दान् देवदत्तः । कर्मसंज्ञाप्रतिषेधः वहेरनियन्तृकर्तृकस्य ॥ वहेर्धातोरनियन्तृकर्तृकस्याण्यन्तस्य यः कर्ता तस्य ण्यन्तस्य कर्मसंज्ञाप्रतिषेधो वाच्यः । वहन्ति बलीवर्दा भारं । वाहयति बलीवर्दान् भारं यज्ञदत्तः ॥ अनियन्तृकर्तृकस्येति किं । वहति बली-

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्दो भारम् । वाहयन्ति बलीवर्दान् भारं पथिकाः । बलीवर्दान् भारं पथिकान् । बलीवर्देषु भारं नीयमाना इत्यर्थः । उक्तोऽयं तिङ्प्रयोगः संक्षेपात् ॥

तिङ्प्रयोगमभिधाय कृतत्प्रयोगमवसरप्राप्तं वक्ष्यामः ।

कृतस्त्रिष्वपि वर्त्तन्ते भावे कर्तरि कर्मणि ॥
अजबल्युट्क्तिन्घञो भावे युजकारोङ्शईरिताः ॥ १ ॥

कृत इति । कृत्प्रत्यया भावकर्मकर्तृषु बिबु भवन्ति । ते यथा । अच्, अप्, ल्युट्, क्तिन्, घञ्, युच्, अकारः, अङ्, श, एते प्रत्यया भावे भवन्ति ।

अच् यथा । चयः नयः इत्यादि पुंस्येव । 'एरच्' इति अच् ।

अप् यथा । करः । वरः । प्रभवः । 'ऋदोरप्' इति अप् ॥

ल्युट् यथा । पचनम्, आत्रमनम्, वहनम्, वरणम् । यानम् श्रवणम् करणम् विकरणम् इति नपुंसके भावे 'ल्युट् च' इति ल्युट् ॥

क्तिन् यथा । कृतिः मतिः बुद्धिः सिद्धिः पुष्टिः वस्तिः प्राप्तिरित्यादि 'स्त्रियां क्तिन्' इति क्तिन् ॥

घञ् यथा । पाकः रागः वादः भावः पादः योगः स्पर्शः भ्रंशः स्पन्दः इत्यादि पुंस्येव । 'भावे घञ्' इति घञ् ॥

युच् यथा । चेतना छेदना भेदना लावना भावनेत्यादि । स्त्रियाम् ॥ 'ण्यासश्रन्थो युच्' इति युच् ॥

अकारप्रत्ययो यथा । चिकीर्षा । जिगिमिषा । चिकित्सा । बुभुत्सा । विवक्षा इत्यादि स्त्रियाम् 'अप्रत्ययात्' इति अः ॥

अङ् यथा । जरा भिदा छिदा भिक्षा इत्यादि स्त्रियाम् 'षिद्भिदादिभ्योऽङ्' इत्यङ् । उपदा अभिख्या इत्यादि स्त्रियाम् । 'आतश्चोपसर्गे' इत्यङ् ॥

शः यथा । क्रिया 'कृञः श च' इति शः इति भाववाचिनः॥

अथ मिश्रवाचकः ।

त्रिषु गत्यर्थकादिभ्यस्तथा चैवादिकर्मणि ।
अकर्मकात्समुत्पन्नो वर्तते कर्तृभावयोः ॥ २ ॥
इष्णुच् क्त्वतु विच्तृन् क्विप् क्मरच्षाकन्ल्युणिन्यचः ।
उकाराणावुकञ्टक्टकादयः कर्तरि स्मृताः ॥ ३ ॥
भावे चोत्तरकाले ल्यप् तुमुन् क्त्वाः पूर्वकालजाः ।
कर्मणि प्रथमा तेषां द्वितीया तु विशेषतः ॥ ४ ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्तमाने तु निर्देशे वर्तते शतृशानचौ ।
तव्यसत्संज्ञकाभ्यां च समासो न तु सिध्यति ॥५॥
ग्रन्थदानाशयेनाहं श्लोकानां पञ्चविंशतेः ।
परार्थभावमुद्वोढुं प्रभवे यं भवे भवे ॥ ६ ॥

सकर्मकाद्धातोः कर्मणि । यथा । देवदत्तेन तीर्णः समुद्रः । भावे यथा । देवदत्तेन भूतम् । 'आदिकर्मणिक्तः कर्तरि च'। गत्यर्थकाद्भ्यः क्तप्रत्ययो भावकर्मकर्तृषु भवति । कर्मणि यथा देवदत्तो ग्रामं गतः । भावे यथा । देवदत्तेन गतम् । अनु शुष्कः सूर्येण ह्रदः ह्रदमनुशुष्कः । शुष्कं ह्रदेन । आश्लिष्टा कन्या देवदत्तेन । कन्यामाश्लिष्टो । देवदत्तः आश्लिष्टं भवतेत्यादि । प्रभुक्तं ओदनं देवदत्तेन । शुद्धं नद्या शुद्धा नदी 'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च' इति क्त प्रत्ययः । कृत्यप्रत्ययाश्च सकर्मकात्कर्मणि । अकर्मकात् भावे भवन्ति ॥

तव्यतव्यदनीयर्यत्क्यप्ण्यतः खल एव च ।
युजिति प्रत्यया अष्टौ कृत्यसंज्ञाः प्रकीर्तिताः ॥ १ ॥

तव्य यथा । भोक्तव्य ओदनो देवदत्तेन देवदत्तस्य वा ॥

तव्यत् यथा । सेवितव्यः । कर्तव्यः । हर्त्तव्यः । इत्यादि ॥

अनीयर् यथा। करणीयम् । स्पृहणीयम् ।' तव्यत्तव्यानीयरः'इति तव्यतव्यदनीयरः ॥

यत् यथा । पेयं देयं ज्ञेयमित्यादि । 'अचोयत्' इति यत् ॥

क्यप् यथा । स्तुत्यः। शिष्यः। कृत्यः । भृत्यः इत्यादि ।'एतिस्तुशास्तृदृजुषः क्यप्' इति क्यप् ॥

ण्यत् यथा । कार्यं भेद्यं छेद्यं भाग्यं वाच्यमिति । 'ऋहलोर्ण्यत्' इति ण्यत् ॥

खल् यथा । सुखेन कर्तुं शक्यः सुकरः । दुःखेन क्रियते दुःकरः। ईषत्करः दुर्लभः इत्यादि।'ईषद्दुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल्' इतिखल् ॥

युच् यथा । अकृच्छ्रेण सुदानं कृच्छ्रेण दीयते।दुर्दानं सुदानं दुःपानमित्यादि । 'आतो युच्' इति युच् ॥

अथ कर्तृवाचिनः ।

इष्णुच् क्त्वतु विच् तृन् क्विप् क्मारच् षाकन् ल्युणिनि अकारः अण् उकञ् ढक् ट क इत्याद्याः । कर्तरि भवन्ति ॥

इष्णुच् यथा । अलंकरिष्णुः । 'अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपजपवृतवृधसहचरइष्णुच्' ॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्तवतु यथा। गतवान् कृतवान्। 'क्तक्तवतू निष्ठा' इति निष्ठासंज्ञायाम् 'निष्ठा' इति भूते कर्तरि क्तक्तवतू॥

विच् यथा। रोट् रेट् सुगण् 'मनिन्क्वनिप्वनिप्विचः' इति विच्।

तृन्। कर्ता हर्ता 'आक्रेस्तच्छीलतद्धर्मतत्साधुकारिषु' इत्यधिकृत्य 'तृन्' इति तृन्॥

क्विप् यथा। उपनिषत् आसूः प्रसूः 'सत्सूद्विषद्रुहयुजविदभिदछिदजिनीराजामुपसर्गेपि क्विप्' इति क्विप्॥

क्मरच् यथा। द्यस्मरो देवदत्तः। 'सृघस्यदः क्मरच्' इति क्मरच्।

षाकन् यथा। ओदनस्य भिक्षाकः। 'जल्पभिक्षकुट्टलुण्ठवृङः षाकन्'॥

ल्यु यथा। नन्दनः॥

णिनि यथा। ग्राही वाही॥

अच् यथा। पचः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'॥

उकारो यथा। चिकीर्षुः तितीर्षुः। 'सनाशंसभिक्षउः'॥

अण् यथा। कुम्भकारः। 'कर्मण्यण्' इति अण्॥

उकञ् यथा। ग्रामं गामुकः। 'लषपतपदस्थाभूवृषहनकमगमशृभ्यउकञ्' इति उकञ्॥

टक् यथा। सीधुपः। 'गापोष्टक्' इति टक्॥

ट यथा। कुरुचरः। 'चरेष्टः' इति टः॥

कः। गोदः। 'आतोऽनुपसर्गे क' इति कः॥

भावे चोत्तरकाले इति॥ **ल्यप्** यथा। प्रणम्य। 'समासे नञ्पूर्वेक्तो ल्यप्'॥

तुमुन् यथा भोक्तुं व्रजति। 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्'। इति तुमुन्॥

क्त्वा यथा। भुक्त्वा व्रजति। समानकर्तृकयोः पूर्वकाले' इति क्त्वा॥

वर्तमाने इति। **शतृ** यथा। जपस्तिष्ठति। **शानच्** यथा। आसीनो ध्यायति हरिम्। 'लटः शतृशानचावप्रथमासमानाधिकरणे'। 'तौ सत्'। 'लटः सद्वा'। 'ताच्छील्यवयोवचनशक्तिषु चानश्'॥

समास इति। हरिः सेवितव्यः। ओदनं भुञ्जन् शास्त्रमधीयानः। स्नानं करिष्यमाणः भोगं भुञ्जानः। अत्र समासो न सिध्यति॥

'दिङ्मात्रमुदितं चेत्थं लौकिकं कृतबुद्धिना॥
कात्यायनेन तद्ब्रूयात् प्रीत्यै राधाविहारिणः'॥

इति श्रीवररुचिविरचितं सोदाहरणकारकचक्रं समाप्तम्॥

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जाहिरात.

श्रीमद्भागवत व्रजभाषाटीका व उत्तम दृष्टांतौ सहित।

श्रीवेदव्यासप्रणीत अठारहों पुराणोंमें श्रीमद्भागवत सबसे कठीन है और इस्का प्रचार भारतखण्डमें सबसे अधिक है यह ग्रंथ क्लिष्टताके कारण सर्व साधारणको टीका होनेपरभी अच्छा रीतिसें समझना कठिनथा कोई कोई स्थलमें बडे २ पण्डितौंकी बुद्धि चक्करमें उडजातीथी इसलिये विना संस्कृत पढे सर्व साधारण पण्डित व स्वल्प विद्या जाननेवाला भगवत्भक्तोंके लाभार्थ संस्कृत मूल व अति प्रिय व्रजभाषाटीका और संबंधित कथाओंसे अधिक उत्तमोत्तम भक्तिज्ञानमार्गी दृष्टांत देकर उत्तम टाईपके अक्षरोंमे विलायती बढिया कागज देकर हमने छपाया है सबके सुगमार्थ मूल्य १५ रुपया है.

श्रीमद्देवीभागवत सटीक.

यह ग्रंथ उत्तम कागज और टाइपका छापा नवीन बहोत सस्ता सातही रुपयेमें तौ लुटारहेहै.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमहाभारत सटीक उत्तम टाइपका.

महर्षि श्रीवेदव्यास प्रणीत और पंचमवेद संज्ञा होनेसे विशेष प्रशंसा करना निरर्थक है हां इतना अलबत्ते कह सकते हैं कि जो १२ महीने पहिले ६०रु० और ८०रु० को दुर्लभथा वही कागज और अक्षर नवीन उत्तम श्याही गणपत कृष्णाजीके छापेका हमने सबका सब १००० पुस्तक लेलिया है और ग्राहक गणोंके सुभातेके लिये ४५रु० मूल्य रक्खा है बहोत पुस्तक विकगई और बराबर विकती चली जाही है महाशय विद्वज्जन शीघ्रही लेलीजिये न लेगा सो पछतायगा क्योंकि पीछे पूर्ववत मूल्य होयजायगा.

मार्कण्डेय पुराण.

नवीन छपाहुआ टाइपका उत्तम कागज और श्याहीका क्लिष्ट शब्दोंकी टिप्पणी इस्के अंतरगत जो दुर्गासप्तशती है उसपर शान्तनवी टीकाहै मूल्य ५ पंचमुद्रा.

शान्तनवीटीका सहित दुर्गासप्तशती नवीन छपकर तैयार मूल्य १ रु०

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जाहिरात.

शुकसागर अर्थात् श्रीमद्भागवतभाषा बारहों स्कंध

यद्यपि भाषा भागवत कईएक सुकवियोंने बनाईहै परंतु मूलसे मिलानेमें यथार्थ मिलती नहींहै इसलिये हमने ब्रजबोलीमें संस्कृत भागवतका भाषा श्लोकानुवाद कराकै अत्यंत शुद्धता पूर्वक पंडितोंसे बनवायके उत्तम अक्षरकागजमें छापाहै और विलायती कपडेकी उत्तम जिल्द बंधी हुईहै महाशय पाठकगण इस्को एक वार मंगाकर देखना जिस श्लोकके अर्थको चाहिये मूलसे मिलालेना मूल्य ७ रु० मात्रहै

व्रतराज.

इसमें बारा महीनेके व्रतोंकी कथा और पूजनविधि उद्यापन विधि सब है किं० रु० ५

सचूर्णिकभागवत-मूल्य टपालमहसूलसमेत ८ रु०

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जाहिरात.

श्रीमद्भागवत ब्रजभाषाटीका व उत्तम दृष्टांत सहित और माहात्म्य भाषाटीकासहित.

श्रीवेदव्यासप्रणीत अठारहों पुराणोंमें श्रीमद्भागवत सबसे कठिन है और इस्का प्रचार भारतखण्डमें सबसे अधिक है यह ग्रंथ क्लिष्टताके कारण सर्व साधारणको टीका होनेपरभी अच्छी रीतिसें समझना कठिनथा कोई स्थलमें बडे २ पण्डितोंकी बुद्धि चक्करमें उडजातीथी इसलिये विना संस्कृतपढे सर्व साधारण पंडित व स्वल्प विद्या जाननेवाले भगवतभक्तोंके लाभार्थ संस्कृत मूल व अतिप्रिय ब्रजभाषाटीका और संबंधित कथाओंसे अधिक उत्तमोत्तम भक्तिज्ञानमार्गी दृष्टांत देकर उत्तम टाईपके अक्षरोंमें विलायती बढिया कागज देकर हमने छपाया है सबके सुगमार्थ मूल्य १५ पंद्रही रुपैया रक्खा है.

श्रीकृष्णदासात्मज गंगाविष्णु-खेमराज
श्रीवेंकटेश्वर छापाखाना मुंबई.

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार

वर्ग संख्या ४३०ग/३ग आगत संख्या ४३३६०

पुस्तक विवरण की तिथि नीचे अंकित है। इस तिथि सहित ३० वें दिन यह पुस्तक पुस्तकालय में वापस आ जानी चाहिए अन्यथा ५० पैसे प्रतिदिन के हिसाब से विलम्ब दण्ड लगेगा।

Entered

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकालय
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार

विषय संख्या 430ग आगत नं० 43360

लेखक 3ग

शीर्षक .....

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या

CC-0. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. Gurukul Kangri Collection, Haridwar